SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
Vol. 1, Issue-2, (Apr-Jun) 2025

# वैदिकवाङ्मये उपलब्धानि कानिचित् यज्ञतत्त्वानि
# Vaidikavāṅmaye Upalabdhāni Kānicit Yajñatattvāni

**Dr. Naba Kumar Das**
Assistant Professor, Dept. of Sanskrit (UG & PG)
Sitananda College, Purba Medinipur, West Bengal, India
Guest faculty, Dept. of Sanskrit, Rabindra Bharati University
Email: nabakumardas@sitanandacollege.ac.in

**Abstract**: The Vedic literature presents *Yajña* as the central institution of ritual, philosophy, and social order. This paper explores select topics on *yajñatattvas* preserved in the *Saṃhitās*, *Brāhmaṇas, Āraṇyakas* and *Śrautasūtras*. It begins with the etymology and origin of *Yajña*, tracing its mythical emergence from *Prajāpati* as a cosmic prototype. The study then outlines classifications—*Śrauta* rituals; *Nitya*, *Naimittika* and *Kāmya* and *Praśchitta* sacrifices; and the canonical triad of *Iṣti Yajña*,*Paśu Yajna* and *Soma yajña*. Detailed attention is given to *Dravyas* such as *ghṛta*, *puroḍāśa*, *soma, paśu*, and their symbolic values. The role of *Devatās* (*Agni, Indra, Varuṇ,* etc.), the function of *Yajamāna* and the organization of *Ṛtvij* priests (*Hotṛ, Adhvaryu, Udgātṛ, Brahmā*) are critically examined. Finally, the paper highlights the Brāhmaṇic interpretation of *Yajña* as the reenactment of cosmic sacrifice, thereby establishing its significance as both theological principle and socio-religious praxis in Vedic civilization.

**Keywords:** Yajna, Origin, Yajamāna, Dravyam, Devata, Ritwik

भारतीयसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। भारतीयानां तथा आर्याणां धर्मतत्त्वं जीवनदर्शनं च वेदे प्रतिफलितम्। तेषां प्रधानं साहित्यं[1] वेदः। प्रत्यक्षेण अनुमानेन वा यत् ज्ञानं न लभ्यते, तद्ज्ञानं वेदेन एव सम्भवति–

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥"[2]

आम्नायः, आगमः, श्रुतिः, वेदः इति सर्वे शब्दाः पर्यायवाचकाः। विद्-धातोः घञि प्रत्यये कृते ज्ञानार्थको वेदशब्दः निष्पन्नः। वैयाकरणसिद्धान्तकौमुद्यां चतुर्षु अर्थेषु विद्-धातोः प्रयोगः दृश्यते—

"सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्-श्नम्शेष्विदं क्रमात्॥"[3]

विद्(अदादि- ज्ञानार्थकः)+घञ्= वेद। अस्यार्थः ज्ञानं विशेषज्ञानं वा। अलौकिकज्ञानात्मको वेदः। मानवाः सदा ऐहिकं पारत्रिकं च सुखमाकांक्षन्ते। इष्टप्राप्त्यनिष्टपरिहारयोः लोकातीतं ज्ञानं वेदे निहितम्। भारतीयानां धर्म-कर्मफल-अपूर्व-परलोकादितत्त्वज्ञानं वैदिकवाङ्मये सन्निविष्टम्। उक्तं च मनुना'वेदः अखिलधर्ममूलम्'[4]। वेदमर्मज्ञाः ऋषयः वेदान् अपौरुषेयमनुभवन्ति। तेषां मतानुसारेण ऋषयः वेदमन्त्राणां द्रष्टारः सन्ति, न तु कर्तारः[5]। प्रतीच्या विद्वांसः वेदान् ऋषिप्रणीतान् मन्यन्ते। वेदः परमपुरुषस्य निःश्वसितस्वरूपम्। अतः वेदस्य वाक्यं प्रमाणम्। उक्तं च मीमांसापरिभाषायां— 'तत्र वेदः स्वतन्त्रप्रमाणम्'[6] इति। वेदः द्विविधः, मन्त्ररूपो ब्राह्मणरूपश्चेति– "मन्त्रब्राह्मणयोर्वेदनामधेयम्[7]।" मन्त्राणां समूहः संहिता। मन्त्रांशः पुनः त्रिविधः– पद्यात्मकमन्त्रः(ऋक्), गद्यबद्धमन्त्रः (यजुः), गीतबद्धमन्त्रः (साम)। मन्त्रांशे देवानामावाहनं स्तुतिकीर्त्तनम्, अभीष्टपूरणार्थं प्रार्थना च विवृतम्। तस्मिन् काले वैदिकसाहित्यमवश्यपाठ्यमासीत्[8]। केचन विपश्चितः कर्मकाण्डं ज्ञानकाण्डम् इति भेदेन वेदविभागं साधितवन्तः। कर्मकाण्डमर्थात् कर्मप्रधानं काण्डम्। यत् क्रियते तत् कर्म, श्रौतकर्म। वैदिकाः धर्मप्रधानमासन्। धर्मानुष्ठानरूपेण ते यज्ञं बुबुधुः। अस्य समर्थने मीमांसापरिभाषायां कृष्णयज्व उवाच— "तत्र वेदबोधितेष्टसाधनताको धर्मः। यथा यागादिः।"[9] इति। प्रकृतपक्षे यज्ञतत्त्वं विना वेदार्थः न सम्यक् अवगम्यते। एवमेव उक्तं काशिकारमहोदयेन— 'One can not unlock the secret of vedic mind, unless he uses the key of knowledge of sacrificial rituals.'[10] अस्मिन् सन्दर्भे केवलं यज्ञस्य व्युत्पत्तिः, अस्य विभागाः, हव्यानि द्रव्यानि, देवताः आलोचिताः।

ब्राह्मणभागस्य प्रधानं प्रतिपाद्यं यज्ञः एव। यज्ञशब्दस्य विविधाः अर्थाः। भ्वादिगणीय-यज्-धातोः नङि प्रत्यये यज्ञशब्दः निष्पन्नः। यज्+नङ्>यज्ञ[11]। यागः यज्ञः अध्वरः पर्यायवाचकः शब्दः[12]। प्रकृतपक्षे देवतामुद्दिश्य द्रव्यत्यागेन अभीष्टलाभार्थं वैदिकप्रक्रिया यागो भवति। यज्ञपरिभाषासूत्रस्य व्याख्याकाले कन्दर्पस्वामिना इदं कथितम्— "स तु यज्ञो देवतोद्देश्येन द्रव्यत्यागात्मको याग इति क्रियाविशेषः।" यज्ञस्यविविधं तात्पर्यम्। विविधानामृषीणामनुभवे यागस्य स्वरुपमनन्यम्। निरुक्तकारः यास्काचार्यः अपि यज्ञस्य निर्वचननिर्णये सन्दिग्ध आसीत्। तेन यज्ञस्य निर्वचनं विविधं कृतम्— "यज्ञः कस्मात् प्रख्यातं यजति कर्म्मेति नैरुक्ताः।"[13] यज्-धातोः अर्थः यजनक्रिया। पुनः तेन कथितम् "याञ्चो भवतीति वा"[14]। अस्यार्थः यज्ञे अन्न-अर्थ-सुवर्णादिद्रव्याणां याचनं भवति। याञ्चा(स्त्री)>याच्+नङ्। स्कन्दस्वामिना इदं निर्वचनं समर्थितम्।

पुनः रुधादिगणीय उन्द्-धातोः यज्ञशब्दस्य व्युत्पत्तिः भवितुमर्हति। उक्तं च निरुक्ते— 'यजुरुन्नो भवतीति वा'। यजुर्मन्त्रेण एव यज्ञः सिक्तं भवति। आचार्यः औपमन्यवः मेने यत् श्रौतकर्मणि ऋत्विग्भिः व्यवहृतात् कृष्णाजिनात् यज्ञशब्दस्य व्युत्पत्तिः अभवत्। अजिन्=इ+अज्+न> यज्+नङ्=यज्ञ। यजुष्+न=यज्+नङ्= यज्ञ >यजूंष्येनं नयन्तीति वा। सृष्टेः प्राक्काले मानवाः प्रकृतेः बिभ्यति। ते प्राकृतिकशक्तिम् अतीन्द्रियशक्तिः, देवता वा मन्यन्ते। तां प्रसन्नं कृत्वा वैदिकजनाः शान्तिमैच्छन्। तामुद्दिश्य द्रव्यस्य प्रियद्रव्यस्य वा यथाविहितसमर्पणं त्यागं वा यज्ञः भवति। प्रकृतपक्षे यज्ञः देवतामानवयोर्मध्ये सेतुः इव विराजते। तरणी यथा यात्रिणं गन्तव्ये नयति तथा यज्ञः यजमानाय आकाङ्क्षितं सुखं समृद्धिं च प्रयच्छति। तथा आम्नायते शतपथब्राह्मणे— "यज्ञो वै सुतर्मा नौः।"[15]

**यज्ञस्य उत्पत्तिः** — वैदिकसमाजे यज्ञानुष्ठानं प्रधानमनुष्ठानम् आसीत्। यज्ञे मन्त्राणां विनियोगः अपेक्षितः। विनियोगो नाम कर्मभिः सम्बन्धः। आम्नायस्य वेदमन्त्राणां वा मन्त्रत्वं श्रौतकर्मणि विनियोगत्वेन निहितमासीत्। उक्तं च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'। श्रौतकार्ये कर्म प्रधानम्, मन्त्रः अप्रधानम्।[16] इदमपि परिदृश्यते यत् यत्र मन्त्रेण सह यज्ञकर्मणः सम्बन्धं न भवति तत्र 'गतो विनियोगः' इति उक्त्वा कर्मणा सह सम्बन्धं दर्शयन्ति मीमांसकाः। कर्म श्रौतकर्म वा वेदस्य निर्यासः। वेदस्य द्वौ विभागौ स्तः। प्रथमस्तु यागाद्यनुष्ठानविषयको विभागः कर्मकाण्डम्, अपरोऽस्ति दार्शनिकविभागः ज्ञानकाण्डम्। वेदविहितं कर्मानुष्ठानं यागः इति कथ्यते। यस्य लक्षणमस्ति-देवतोद्देश्येन द्रव्यत्यागो यागः। आदौ यज्ञानुष्ठानं सरलमासीत्। कालक्रमेण तत् जटिलं साड़म्बरं च अभवत्। ब्राह्मणग्रन्थेषु पुनः पुनः यज्ञप्रशंसनं परिदृश्यते यथा 'यज्ञो हि श्रेष्ठतमं कर्म'[17]; 'यज्ञो वै श्रेष्ठतमं कर्म'[18]। प्राचीनाः वैदिकाः मेनिरे यत् यज्ञस्य हेतोः वेदविभागः अभवत्— हौत्रवेदः, औद्गात्रवेदः, आध्वर्यववेदः, ब्राह्मवेदः। ब्राह्मणादिग्रन्थे यज्ञस्य उद्भवविषये अनुशीलनादिविषये च धारणा उपलभ्यते। गोपथब्राह्मणमगदत्– प्रजापतिरादौ यज्ञं दृष्टवान्। सृष्टेः प्राक् परमब्रह्म एकाकीं विराजमानमासीत्। स एकावयवात् बहुं भवितुमीयेष। अथ स आत्मानं सन्तप्तं कृतवान्। तस्य रोमकूपात् स्वेदवारि क्षरितवत्। तस्मात् स्वेदवारिणः यथाक्रमेण आपः, प्रजापतिः, ॐकारः, सर्पपिशाच-असुर-इतिहासपुराणादिपञ्चवेदः, महाव्याहृतिःअजायन्त। पुनः यदा सः आत्मानं सन्तप्तं कृतवान्, तदा स यज्ञमवलोकितवान्[19]।

शतपथब्राह्मणे तैत्तिरीयब्राह्मणे अपि इदमाख्यानं भिन्नभावेन कथितम्। प्रजापतिः आदौ यज्ञं साधितवान्। सः एकस्मात् बहवः भवितुम् ऐच्छत्। तदा स यथाविधि व्रतं धारयित्वा अग्निमन्थनम् कृतवान्। परमाहुतिदानाय किमपि द्रव्यं नासीत्। ततः सः हस्तौ प्रक्षालितवान्। तस्मात् हवींषि पयांसि च अजाये। तैः स अजुहोत्।तस्य स्वमहिमा पुनः होतुं निर्दिशति। प्रजापतिः स्वयमात्मानमाह। अतः 'स्वाहा' इति शब्दः प्रजायते। अनेन अग्निहोत्रं जायते। ततः वाजपेयम्, अग्निहोत्रं च असृजत्।

आम्नातं जैमिनीयब्राह्मणे अपरमेकमाख्यानम् यज्ञोत्पत्तिविषये। प्रजापतिः तत्र प्रजानां

भूतानां च पिता आसीत्। स एव हिरण्यगर्भो जगतो धारकः। स द्विपदानां चतुष्पदानां प्राणिनां प्रभुः। ऋग्वेदस्य हिरण्यगर्भसूक्ते अस्य समर्थनं परिदृश्यते[20]। परं ते एनं न पूजितवन्तः। तदा असौ विषण्णः अभवत्। श्रद्धाप्राप्ताय अमुना अपचितियागो दृष्टः, ततः सम्पादितः। अनेन तस्य कामना साधिता[21]। सृष्टेरादौ किमासीत्, कुतो वा जगतः उत्पत्तिरीति विषये वैदिकाः पुनः पुनः जिज्ञासन्ते— 'को ददर्श प्रथमं जायमानम्'[22]। हिरण्यगर्भसूक्ते जगतः सृष्टिविषयं समधिकृत्य आलोचनं परिदृश्यते। सृष्टेः प्राक् आसीत् जगत् जलव्याप्तः[23]। तस्मात् हिरण्मयाण्डमिव हिरण्यगर्भ आविर्भूतः। स एव प्रजापिताः प्रजापतिर्वा। स ब्रह्माण्डस्य अधिपतिः[24]। परन्तु कथं यज्ञोत्पत्तिः भूयते? विषयेऽस्मिन् ब्राह्मणेषु आख्यानानि समुपलभ्यन्ते। ऐतरेयब्राह्मणानुसारं प्रजापतिः आदौ यज्ञमसृजत् ।[25]

मन्त्रब्राह्मणात्मकं वेदशास्त्रं कर्मकाण्डं ज्ञानकाण्डमिति भिदन्ति केचिद् वैदिकाः। संहिता ब्राह्मणञ्च कर्मकाण्डस्य, आरण्यकम्, उपनिषद् च ज्ञानकाण्डस्य अन्तर्भुक्तम्। कर्मप्रधानं कर्मकाण्डम्। कर्म इत्यनेन अत्र यागादिश्रौतकर्म बोध्यव्यम्। ब्राह्मणशास्त्रैः यज्ञकर्म मुहुर्मुहुः प्रशंसितम्। कर्मसु यज्ञः श्रेष्ठतमः। तथा चोक्तं ब्राह्मणेषु— 'यज्ञो हि श्रेष्ठतमं कर्म'[26], 'यज्ञो वै श्रेष्ठतमं कर्म'[27] इति। ब्राह्मणांशे यागयज्ञादीनां कर्मणां विवरणं वर्णितम्। तरणीसदृशो यज्ञः। ऋत्विक् तस्याःकर्णधारः। यथा कर्णधारः निर्विघ्नं नावा यात्रीन् गन्तव्यं नाययति तथा ऋत्विक् यजमानान् यज्ञेन ऐहिकामुष्मिकानि फलानि दापयति। प्राचीना इदमपि मन्यन्ते यत् यज्ञप्रयोजनस्य हेतौ कृष्णद्वैपायनवेदव्यासः अनाद्यन्तं वेदं विभेद। ते यथा हौत्रवेदः(ऋग्वेदः), औद्गात्रवेदः (साम), आध्वर्यववेदः(यजुः), ब्राह्मवेदः (अथर्व)। वेदानां मन्त्रविन्यास एव यज्ञानां हेतौ कृतः। यजुर्वेदे यज्ञमाश्रित्य विशेषालोचनानि परिदृश्यन्ते। उक्तं च 'यजुर्वै यजते'। वेदविदुषा सायणाचार्येण यज्ञे यजुर्वेदस्य प्राधान्यं स्वीकृतम्। तेन यजुर्वेदस्य व्याख्यानमादौ कृतमृग्भाष्योपक्रमे[28]। तत्र वाजसनेयिसंहितायां मन्त्रा दर्शपूर्णमासौ, अग्न्याधानम्, अग्निष्टोमः, वाजपेयः, राजसूयः, चयनः, सौत्रामणी, अश्वमेधः, पुरुषमेध इति क्रमाणुसारेण विन्यस्ताः। ऋग्वेदस्य मन्त्रविन्यासे अयं विचारो न लक्षितः। परं सामवेदस्य उत्तरार्चिके सूक्तानि यज्ञानां क्रमाणुसारेन सुसज्जितानि।

**यज्ञस्य विभागः** — यज्ञस्य विभागः न अनायाससाध्यः। विविधेषु ब्राह्मणेषु यज्ञस्य विविधाः भेदाः प्रदर्शिताः। परन्तु 'नासौ मुनिर्यस्य मतं न भिन्नम्' इव तेषां मतं परस्परविरुद्धम्। अथ श्रौतकर्मणः शुक्लः कृष्ण इव विभाजनं न सम्भवति। यज्ञस्य विविधा भेदाः परिलक्ष्यन्ते। केचित् पण्डिता वदन्ति— यज्ञ द्विविधः, श्रौतः गृह्यश्च। श्रुतौ प्रदर्शितो यज्ञ श्रौतयज्ञः। तत्र गार्हपत्यः, आहवनीयः, दक्षिणः इति त्रिषु अग्निषु ऋत्विक् जुहोति। अथ यज्ञस्य अपरं नाम वितानम्[29]। यजमानः खलु यज्ञकर्ता। इष्टि-पशु-सोमादिभिः श्रौतयज्ञैः सपत्नीकः यजमानः निश्रेयसं यज्ञफलं च लभते। अपरपक्षे गृह्यकर्मणो विवरणमाम्नाये विस्तृतं न उपलभ्यते। अत्र

केवलम् कुण्डैके अग्निः प्रज्वलति। अस्य अग्नेर्नाम आवसथ्यः, औपासनः स्मार्ताग्निर्वा। विवाह-गर्भाधानोपनयन-पञ्चमहायज्ञादिभिः गृह्यकर्मभिः यजमानस्य परिवारस्य सदस्या अभ्युदयं लभन्ते। याज्ञिका अवदन् यज्ञ एव वेदस्य प्रधानं प्रतिपाद्यम्। परिदृश्यन्ते वेदे यज्ञस्य विविधाः विभागाः। चतुर्षु वेदेषु अभ्यर्हितस्य ऋग्वेदस्य प्राथम्यम्[30]। तस्य ऐतरेयारण्यके यज्ञस्य पञ्चविभागाः निगदिताः-अग्निहोत्रम्, दर्शपुर्णमासौ, चातुर्मास्यानि, पशुः सोमश्चेति— "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ-चातुर्मास्यानि पशुः सोम।"[31] परं कया युक्त्या अग्निहोत्रम्, दर्शपुर्णमासौ, चातुर्मास्यानि, पशुः सोमस्य पञ्च विभाग इति विषये मौनमासीत् आरण्यकम्। पुनः कृष्णयजुर्वेदस्य तैत्तिरियब्राह्मणे यज्ञस्य पञ्चविधत्वम् आम्नातम्[32]। यज्ञे नियुक्तानां पुरोहितानां संख्यानुसारं यज्ञस्य पञ्चविधत्वं स्वीकृतम्।[33] अग्निहोत्रं खलु यजमानकर्म। अशक्तो यजमानः ऋत्विजैकेन अग्निहोत्रं सम्पादयति। दर्शपूर्णमासयागे चत्वारः ऋत्विजो यजेयुः। ते यथा होता, अध्वर्युः, आग्नीध्रः, ब्रह्मा। चातुर्मास्ययागे पञ्च ऋत्विजोऽपेक्षिताः। ते खलु होता, अध्वर्युः, प्रतिप्रस्थाता, आग्नीध्रः, ब्रह्मा च। निरूढपशुबन्धयागः षड्-ऋत्विक्साध्यः। अत्र मैत्रावरुणः अतिरिक्तः। सोमयागः सप्तऋत्विग्भिः सम्पन्नः। उक्तं च तैत्तिरीयब्राह्मणे— "सोमयागे होता मैत्रावरुणब्राह्मणच्छंसीनेष्टापोता आग्नीध्रो अच्छावाकश्चेति सप्त होत्रान् दर्शयत।"[34]

शतपथब्राह्मणेऽपि यज्ञस्य इदं पञ्चविभाजनं स्वीकृतम्। तत्र निगदितम् अङ्गुलयः पञ्च, अथ यज्ञः पञ्चविधः— "यच्छन्तां पञ्चेति पञ्चवाह इमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतदत्र दधाति॥"[35] यज्ञे देवतामुद्दिश्य पञ्चविधं हव्यं दैवान्नं वा प्रदीयते। ते खलु धाना(भृष्टःयवः), करम्भः(दधिमिश्रितः सक्तुः), परिवापः(लाजाः), पुरोडाशः(व्रीहिचुर्णनिर्मितं यवचूर्णनिर्मितं वा पिष्टकम्), पयस्या(आमिक्षा) इति। वैदिकाः पुनः आहुतिद्रव्यानुसारं यज्ञस्य त्रिविधत्वं स्वीकृतवन्तः। इष्टियागो यत्र प्रधानतया देवेभ्यो हविः प्रदीयते, पशुयागो यत्र हविषा सह पश्वाहुतिः करणीया, सोमयागे हविषा, पशुना समं प्रधानतया सोमाहुतिः प्रदेया।

**द्रव्याणि—** उद्दिश्य देवतान् द्रव्यत्यागो यागः। यज्ञे कानि द्रव्याणि होतव्यानि? वैदिकार्याः युगपत् कृषिकार्यं पशुपालनञ्च अकुर्वन्। शस्यं गोधनञ्चासीत् तेषां वित्तम्। अतः यज्ञे आहुतेषु द्रव्येषु शस्यानां गव्यद्रव्याणाम् चाधिक्यं परिदृश्यते। शस्येषु व्रीहिः, यवः, तिलः अन्यतमाः। व्रीहीणां यवानामवहननं कृत्वा पुरोडाशं प्रस्तूयते। पुरोडाशमिदं इष्टियागस्य प्रधानमाहुतिद्रव्यम्। पितृभ्यः तिलाञ्जलिः प्रदेया। अद्यापि श्राद्धानुष्ठाने पितृभ्यः प्रधानतया तिलः प्रदेयः। पयः, दधि, आज्यं[36], हविः, नवनीतं, आमिक्षा इति आहुतिरूपेण प्रदीयते। अग्निहोत्र-दर्शपूर्णमासादिश्रौतकर्मसु हविषा इज्यते। पुनः चातुर्मास्ययागस्य वरुणप्रघासपर्वणि वरुणमुद्दिश्य आमिक्षा त्यज्यते। कुत्रापि वा तप्तपयसा समं दधि संयुज्य सान्नाय्ययागं कृतवन्तः पुरोहिताः। पशुयागे अन्यैर्हव्यद्रव्यैः सह देवतामुद्दिश्य वपा प्रदीयते। वपा अर्थात् पशुमेदः[37]। यज्ञविशेषे हृदयम्, जिह्वा, वक्षः, यकृत, बृक्कम्, वामबाहुः, श्रोणिः, अन्त्रमिति अङ्गानि आहुतिरूपेण

प्रदीयन्ते। पशूनां छागः प्रधानतया हीयते देवतामुद्दिश्य। क्षेत्रविशेषे मेषं गामपि वा देवमुद्दिश्य उत्सृजेत। अश्वमेधयज्ञे अश्वो मुख्यपशुः आसीत्। यज्ञान्ते यजमानो नृपः तमुत्सृजेत्। अश्विनकुमारौ देवभिषगौ आस्ताम्। तौ रात्रिन्दिवम् इति कल्प्येते। अतः तौ उद्दिश्य श्वेतवत्सस्य कृष्णगोः पयसा अजुहोत्। वायुमुद्दिश्य श्वेतं छागालम्भनं कुर्यात्– 'वायव्यं श्वेतमालभेत भूतिकाम'[38]। अश्वमेधयज्ञे होतुम् अश्वस्य संज्ञपनं साधनीयम्। तेन सह सप्तशतानि पिञ्जराबद्धा वन्यपशवः पक्षिणश्च उत्सृज्यन्ते। ततः ते विमुक्ताः। अश्वमांसं वैदिकानां प्रियाहार आसीत् इति न मन्यते। आसीत् खलु अश्वः प्रतीको गतिशक्तेः। अतः क्षत्रिययज्ञे[39] अश्वमेधयज्ञे क्षत्रियः पराक्रमलाभाय अश्वेन जुहोति।

सोमयागे सोमः मुख्यद्रव्यमासीत्। सोमः एका लता ओषधी वा। सोमलता श्यामलवर्णा, दुग्धमिव रसपूर्णा, अम्लस्वादयुक्ता, वमनोद्रेककारिणी, छागभक्ष्या च।

"श्यामलाम्ला च क्षीरिणी त्वचि मांसला।
श्लेष्मला वमनी वल्ली सोमाख्या छागभोजनम्॥"[40]

लतेयं पञ्चदशपत्रविशिष्टा वल्ली इति वर्णितं सुश्रुतसंहितायाम्। यथाविहितकौशलेन सोमलतात् रस निष्काशते। रसोऽयं देवानां प्रियं पानीयम्। सोमपानेन ते हर्षिता अभवन्— 'सोमेनानन्दं जनयन्'[41]। ऋग्वेदस्य नवमे मण्डले सोममण्डले वा सोमं अमृतम्, मधुमन्तम्[42] इति आख्यया अचक्षत ऋषयः। सोमोऽयं सुदुर्लभः। केचन मन्यन्ते सोमलता Sarcostemma Vinimela अथवा Aselepias Acida इति उद्भिदविशेषा। केचिद्वा मन्यन्ते सोम आफगानप्रदेशस्य द्राक्षाफलम् इक्षुर्वा[43]। श्रौतसूत्रयुगे हि सा लता सुदुर्लभा आसीत्। अथ सोमाभावे पूतिकालता व्यवह्रियते। ऋग्वेदस्य प्रधानो देव इन्द्रः। सोऽतीव सोमाभिलाषी। सोमपानेन वलवान इन्द्रो वृत्रादीन् असुरान् च जेघ्नीयते। आम्नातं च ऋग्वेदे 'कुवित् सोमस्यापामिति'[44] इति। सोमं विना सुराहुतिरपि प्रदीयते सौत्रामणीयागे।[45]

**देवता** — आसीत् यज्ञे देवानां भूमिका गुरुत्वपूर्णा। ऋत्विक् देवतामुद्दिश्य हव्यादीन् द्रव्याणि विताने अत्यजत्। देवता, देव इति समार्थकशब्दः। 'यो देवः सा देवता'[46]। दिव्-धातोः बहवोऽर्थाः सन्ति। प्रकाशार्थकं दिव्-धातोरुत्तरम् अच्-प्रत्ययेन देवशब्दः सिद्धः। दिव्+अच्>देव, देव+तल्>देवता। यास्काचार्येण देवशब्दस्य निर्वचनमिदं निर्दिष्टम्– "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा।"[47] या ददति, याः प्रकाशितं भवन्ति, या द्युस्थाने तिष्ठन्ति ता एव देवताः। श्रीमदनिर्वाणमतानुसारं देवशब्दस्य अर्थ आलोकः, यः न केवलं वहिः तिमिरमपसारयति, मानसकं तमिस्रामपि अपसारयति[48]।

यज्ञेषु मन्त्राणां विनियोगप्रसङ्गेन सूक्तानां देवताऋषयश्छन्दांसि च उच्यन्ते। मन्त्रस्य सुनिर्दिष्टा देवता विद्यते यतो मन्त्र आम्नाये विनियुक्तः भवति– "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानांतस्मादनित्यमुच्यते"।[49] इदमपि परिदृश्यते यत् केषांचित् मन्त्राणां

देवता न विद्यन्ते। तत्र यस्मिन् यज्ञे अयं मन्त्रः प्रयुक्तः, तस्य देवता खलु मन्त्रस्य देवता— 'यद्देवतः यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति'[50]।

भारतीयानां धर्मदर्शनं वैदिकदेवतातत्त्वं च ओतप्रोतम्। वेदेषु प्रधानतया तिस्रः देवताः परिगण्यन्ते। अयं विभागः स्थानानुसारम्। पृथिवीलोके प्रधानदेवता अग्निः, अन्तरिक्षलोके वायुः इन्द्रदेवता च, तथा द्युलोके सूर्यदेवता— 'तिस्र एव देवता इति नैरुक्ताः अग्निः पृथिवीस्थानो, वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्यो द्युस्थानः'।[51] महर्षिणा शौनकेन इदं विभाजनं समर्थितं बृहद्देवताग्रन्थे—

"प्रथमो भजते त्वासां वर्गोऽग्निमिह दैवतम्।
द्वितीयो वायुमिन्द्रं वा तृतीय सूर्यमेव च॥"[52]

परं वेदे अनेका देवताः परिदृश्यन्ते। वाजसनेयीसंहितायामनेकाया देवताया नामानि उपलभ्यन्ते– "अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता आदित्या देवता मरुतो देवता विश्वे देवा देवता वृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता।"[53] प्रकृतपक्षे अमूः देवताः त्रयाणां देवानां नामान्तरमेव-'तासां माहाभाग्यादेकैकस्य अपि बहूनि नामधेयानि भवन्ति'[54]।

स्वाध्यायकाले ऋषिणा छन्दसा समं देवता अपि विज्ञायते।

"वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः।
दैवतज्ञो हि मन्त्राणां तदर्थमवगच्छति॥"[55]

विताने यामुद्दिश्य हुतव्यं होतव्यं वा तस्याः स्वरूपमवश्यमेव ज्ञातव्यम्। अन्यथा श्रौतकर्म न सम्भवेत्। यो देवतातत्त्वं न जानाति स यज्ञफलं न लभते।

"न हि कश्चिदविज्ञाय याथातथ्येन दैवतम्।
लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते॥"[56]

अमूः देवताः पुरुषविधा अपुरुषविधा वा इति विषये वादानुवाद परिदृश्यते। केचिद् मन्यन्ते देवो मानवसदृश आकृतिविशेषः। अतः अग्निसूक्ते सूर्यसुक्ते इन्द्रादिसूक्ते च तेषां मानव इव कलेवरं कल्पितम्। ते सोमं पिवन्ति, हविर्भक्षन्ति, विवाहादिगृह्यानुष्ठाने ते संयुक्तं सम्पृक्तं वा सन्ति।[57] केचिद्वा मन्यन्ते प्रकृतपक्षे देवता खलु प्राकृतिकशक्तेः प्रतिभूः, अग्निं वायुं सूर्यं पृथिवीं चन्द्रं मानवा नित्यं पश्यन्ति। ते अत्र देवतारूपेण प्रतिभान्ति। MacDonnell-महोदयेनेदं मतं स्वीकृतम्– "This is concerned with the worship of gods that are largely personification of the powers of nature. The hymns are mainly invocations of these gods and are meant to accompany the oblations of the fire sacrifice of melted butter. It is thus essentially a polytheistic religion, which assumes a pantheistic colouring only in a few of its latest hymns"[58] इति।

वैदिकदैवततत्त्वे आर्याणां पितृतान्त्रिकव्यवस्था प्रतिफलिता। तत्र पुरुषदेवतानां प्राधान्यम्। स्त्रीदेवतासु उषा, वाक्, सरस्वती च प्राधान्येन स्तूयते। स्थानानुसारं तिस्रः देवता देव्यो वा आम्नाता वेदेषु। भूलोके प्रधाना देवी इला, अन्तरिक्षलोके सरस्वती, द्युस्थाने भारती च–

'आ नो यज्ञं भारती तूयमेत्विळा मनुष्यदिह चेतयन्ती।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु।।"[59]

आदौ वैदिका बहुदैवतां (Polytheism) विश्वसन्ति स्म।परंवेदान्ते तैरकमद्वितीयंब्रह्म वा अनुभूतम्। वेदे यज्ञवर्णना अनन्ता। परमत्र संक्षेपेण वैदिकवाङ्मयोद्दिष्टाः काश्चन यज्ञकथाः वर्णिताः।

## Endnotes

1. 'वेदस्य पश्य काव्यं न ममार न जीर्यति'। *अथर्ववेदः* १०/५/३२
2. मीमांसान्यायमाला।
3. चुरादिप्रकरणम्, *वैयाकरणसिद्धान्तकौमुदी*
4. *मनुसंहिता* २/६।
5. ``एवमुच्चवचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति।'' *निरुक्तम्* ७/३/२१ ।
6. *मीमांसापरिभाषा*।
7. *आप. श्रौ.* २४/१/३१।
8. `स्वाध्यायोऽध्येतव्यः' ।
   `ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'।
   `ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्...' (*छा.उ.*७/१/२)
9. *मीमांसापरिभाषा,*४।
10. C.G.Kashikar
11. "यजयाचयतविच्छप्रच्छरक्षो नङ्" *अष्टा.*३/३/९०।
12. *अ.को.*२/७/१३
13. *निरुक्तम्* ३/१९/८
14. *तदेव*
15. *श. ब्राह्मणम्*
16. " मन्त्रेष गुणभूतेषु प्रधानेषु च कर्मसु। प्रधानगुणभूताः स्युर्देवता इति गम्यते॥" *बृहद्देवता.* ५/९६।
17. *तै. ब्राह्मणम्* ३/२/१/४
18. *श. ब्राह्मणम्* १/७/१/५
19. *गो. ब्राह्मणम्* १.१.१२
20. "यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
    य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥" *ऋग्वेदः*१०/१२१/३
21. *Sacrifice in The Brāhmaṇa-Texts;* G.U.Thite, pg-7 .

22. *ऋग्वेदः* १/१६४
23. 'तद्वा इदं आपः सलिलमासीत्' *तै.ब्रा.* २/२/९/४।
24. *ऋग्वेदः*१०/१२१/१।
25. *ऐ. ब्राह्मणम्*७/१९,
26. *तै. ब्राह्मणम्*३/२/१/४
27. *श. ब्राह्मणम्*१/७/१/५
28. "अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात् तत्र तु यजुर्वेदस्यैव प्रधानत्वात् तद्व्याख्यानमेव आदौ युक्तम् ।" *ऋग्भाष्योपक्रमणिका ।*
29. 'बह्वग्निसाध्यानि कर्माणीत्यर्थः' *आ. गृ.* नारायणीवृत्तिः।
30. 'सर्ववेदाध्ययन-तत्पारायण-ब्रह्मयज्ञ-जपादौ ऋग्वेदस्यैव प्राथम्यम्' *ऋग्भाष्योपक्रमणिका*।
31. *ऐ. ब्रा.* २१३/३
32. *तै. ब्रा.*११/३/६/१-३
33. *Sacrifice in The Brāhmaṇa -Texts*, G.U.Thite, p-105
34. *तै. ब्रा.* २/३/६।
35. *श. ब्रा.*१/१/२/१६
36. 'सर्पिर्विलीनमाज्यं स्यात्' सायणाचार्यः।
37. *अ. को.*२/६/६४
अथ वल्मीकवपा सुषिरा व्यध्वे निहिता भवति' *श. ब्रा.*,६/३/३/५
38. *मीमांसापरिभाषा*।
39. *श. ब्रा.*१३/४/१/२।
40. *वैदिकयज्ञ*, पृ-३६।
41. *ऋग्वेदः* ९/११३/६।
42. *तदेव*९/१०६।
43. *वैदिकवाङ्मये सोम*, ड. विश्वनाथ मुखोपाध्याय, पृ.२२।
44. *ऋग्वेदः* १०/११९।
45. *यज्ञतत्त्वप्रकाशः*,पृ.-१०८।
46. *निरुक्तम्*७/१५/५।
47. *तदेव*७/१५/४।
48. *वेदमीमांसा*, द्वितीय खण्ड,पृ.३।
49. *जै. सू.* १/२/१ *ऋग्भाष्योपक्रमणिका*।
50. *निरुक्तम्*७/४/२।
51. *तदेव*७/५/१-२।
52. *बृ.*१/५।
53. *वा. सं.* १४/२०।
54. *निरुक्तम्*७/५/३।

55. *बृहद्देवता* १/२।
56. *तदेव* १/४।
57. *ऋग्वेदः*. १०/९५।
58. *Vedic Reader*, Pg-18 .
59. *ऋग्वेदः* १०/११०/८

## Bibliography


- *Agniṣtoma Paddhati.* Ed. Bhagavat Prasada Sharma, Chowkhamba Sanskrit Series No. 479, Banaras City: Chowkhamba Sanskrit Series Office, 1937.
- *Āpastamba-Sāmānya-Sūtra or YajñaparibhāṣāSūtra.* Ed. Samiran Chandra Chakrabarti. Bibliotheca Indica Series No 328, Kolkata: The Asiatic Society, 2006. English.
- *Āśvalāyana-Śrautasūtra.* Ed. Amarkumar Chattopadhyay. Bibliotheca Indica Series No. 322, Kolkata: The Asiatic Sociaty, 2002. Bengali.
- Bandyopadhyaya, Shanti. *Vaidik Yuger Yāgyajña*. Sanskrit Pustak Bhandar, Kolkata, Bangabda1417 (1st ed. 1395). Bengali.
- Bhide, V.V. *The Cāturmāsya Sacrifice, with special reference to Hiraṇyakeśi Śrautasūtra.* Pune: University of Poona, 1979. English.
- Dharmadhikari,T.N. Ed. *Yajñāyudhāni.* Pune: Adarsha Sanskrit Shodha Samstha, 2013(2nd ed. 1st ed. 1989). English.
- Dange, S.S. *Sacrifice in India Concept and Evolution.* Aliigarh: Viveka Publications, 1987.
- *Gopatha Brāhmaṇa:* Ed. Taraknath Adhikari. Calcutta: Rabindra Bharati University, 1999. Bengali.
- Jain, Kuwarlaal. *Vaidikī Yajñavidyā.* Delhi: Itihasavidya Prakasan, 1991.
- Mimansaka, Yudhisthira. *Śrauta-Yajña-Mīmāṃsā.* Calcutta: Srimati Savitridevi Bagariya Trust, 1987. Hindi, Sanskrit.
- *Ramendra Rachanavali.* Ed. Brajendranath Bandopadhyaya, Sajanikanta Das. Part 3, Calcutta: Bangiya sahitya Parisat, 1324 BY. Bengali.
- Sastri, Chinnaswami. *Yajñatattvaprakāśa.* Ed. RamanathaDikshita. Calcutta: University of Calcutta, 1951. Sanskrit.
- Sukthankar, V.S. *Critical Studies in the Mahābhārata.* Vol. 1. V.S.Sukthankar Memorial Edition, Bombay: Karnatak Publishing

House, 1944. English.

- *Taittirīya-Brāhmaṇa.* Ed. & Trans. Trishna Chatterjee. Vol. 1. Vedagranthamālā 14, Kolkata: Ramakrishna Mission Institute of Culture, 2016. 3 Vols. Bengali.
- *Taittirīya-Brāhmaṇa.* Ed. & Trans. Trishna Chatterjee. Vol. 2. Vedagranthamālā 14, Kolkata: Ramakrishna Mission Institute of Culture, 2017. 3 Vols. Bengali.
- *Taittirīya-Brāhmaṇa.* Ed. & Trans. Trishna Chatterjee. Vol. 3. Vedagranthamālā 14, Kolkata: Ramakrishna Mission Institute of Culture, 2018. 3 Vols. Bengali.
- Thite, Ganesh Umakant. *Sacrifice in the Brāhmaṇa-Texts.* Poona: University of Poona, 1975. English.
- Śaunaka. *The Bṛhad-devatā.* Ed. Arthur Anthony Macdonell, Cambridge: Harvard University, 1904.

——